S.V. Apte, English-Sanskrit Dictionary -- 3rd ed. Pune 1920



**Jolthead,** *s.* स्थूलबुद्धिः, मूर्खः, मूढः; *See* **Fool.**

**Jostle,** *v. t.* स्कंधताडनेन निराकृ 8 U or निः-सृ c. or निर्-धू 6 P, 5, 9 U or निर्-अस् 4 U; परस्परं समाहन् 2 P or संघृष् 1 P or संमृद् 9 P, अभिसं-पत् 1 P; संघट्ट् 1 A. **-ing,** *s.* परस्परसमाघातः-घर्षणं, अन्योन्य-संमर्दः, अभिसंपातः.

**Jot,** *s.* कणः, लवः, अणुः, लेश-लव-कण-बिंदु-मात्रं, तिलमात्रं. **-***v. t.* ( स्मरणार्थं ) लिख् 6 P or अंक् 10. **-ting,** *s.* अभिलिखितं.

**Journal,** *s.* वार्ता-वृत्त-समाचार-पत्रं or पत्रिका. **-ist,** *s.* वृत्तपत्रप्रकाशकः-लेखकः.

**Journey,** *s.* प्रयाणं, प्रस्थानं, प्रवासः, यात्रा, देशभ्रमणं-पर्यटनं, अध्वन् *m.*, मार्गः, अध्व or मार्ग-गमनं or क्रमणं, 'on account of the fatigues of j.' अध्वसंजातखेदात्; उत्थाय पुनरवहत् ( Ka. 299 ). 'resumed his j.' &c.; 'it is only a week's j.' सप्ताहगम्योऽध्वा; 'to return from a j.' प्रवासाद् उपानि-वृत् 1 A; 'may the j. be pleasant to you' शिवास्ते पंथानः संतु. **-***v. i.* प्र-या 2 P, मार्गेण गम् or व्रज् or चर् 1 P or या, पर्यट् 1 P, परिभ्रम् 1, 4 P वह् 1 P, दिवा रात्रौ चावहत् ( Ka. 301 ); 'to j. abroad' प्रवस् 1 P. **-er,** *s.* अध्वगः, पथिकः, पांथः, यात्रिकः. **-Journeyman,** *s.* वैतनिकः, हस्तकर्मकारः.

**Jovial,** *a.* उल्लासिन्, सदानंदिन्.

**Joy,** *s.* आनंदः, हर्षः, उत्सवः.

**Jubilant,** *a.* जयघोषं कुर्वाण, जयध्वनिकारिन्.

**Jubilate,** *v. i.* जयघोषं कृ 8 U, नंद् 1 A, हृष् 1 P.

**Jubilee,** *s.* प्रहर्षः, महोत्सवानंदः, महोत्सवः, उत्सवकालः.

**Judge,** *s.* प्राड्विवाकः, अ( आ )धिकरणिकः, अक्षदर्शकः, धर्माध्यक्षः, धर्माधिकारिन् *m.*, न्यायाध्यक्षः, निर्णेतृ *m.*, दंडनायकः. **2** ( In general ) अभिज्ञः, गुणदोषज्ञः, विशेषज्ञः, परीक्षकः, परिच्छेदकः, विवेकिन् *m.*, गुणग्राहिन् *m.*, रसज्ञः, तद्विद् *m.*,**-***v.* वि-विच् 3, 7 U, परिच्छिद् 7 P, वि-ज्ञा 9 U, विभू c., विचर् c., निर्णी 1 P, निश्चि 5 U, अव-निर्-धृ 10, अव-परि-ईक्ष् 1 A, तीर् 10, अनु-सं-धा 3 U. **2** वितर्क् 10, विमृश् 6 P, विगण् 10, विकल्प् c., मनसा विचर् or विविच्, मन् 4 A; 'it is for you to j. whether &c.' एतद्विषये भवान् प्रमाणं; 'j. me by my acts' फलेन मद्गुणदोषनिर्णयः क्रियतां; 'to j. ill or wrongly' मिथ्या क्लृप् c. or संभू c. or मन्. **-ment,** *s.* विवेकः, परिच्छेदः, विचारः-रणा, विज्ञानं, विभावनं, निर्धारणा, निर्णयः, निश्चयः, संकल्पः, अवधारणं-णा. **2** ( Judicial decision ) निर्णयः, विचारः, निर्णयपादः, आधर्षणं; तीरणं, दंडाज्ञा. **3** अनुभवः, तर्कः, ज्ञानं, अनुमानं. **4** मति *f.*, बुद्धि *f.*, मतं, अभिप्रायः, संकल्पः, बोधः; 'according to one's j.' यथामति, यथाबुद्धि. **5** (Divine j.) ईश्वराज्ञा, ईश्वर-विधिः-नियमः-शासनं; 'j.-day' विचारादिनं; 'j.-hall' न्यायसभा, विचार-धर्म-सभा; 'j.-seat' व्यवहारासनं, न्यायासनं, धर्मासनं. **-Judicatory,** *s.* धर्म-विचार-न्याय-सभा, व्यवहारमंडपः, धर्माधिकरणं. **2** न्यायप्रणयनं. **-Judicature,** *s.* न्यायाधिकारः, व्यवहार-दर्शनाधिकारः; *See* **Judicatory** above. **-Judiciary,** *a.* विचारक, व्य( व्या )वहारिक ( की *f.* ). **-Judicial,** *a.* व्यवहार-विषयक, व्यवहार in comp.; 'j. proceeding' व्यवहारदर्शनं, व्यवहारः, न्यायविचारः. **-ly,** *adv.* व्यवहारानुसारेण, यथा-व्यवहारं, न्यायानुरूपं. **-Judicious,** *a.* ( Act ) समीक्ष्य-विमृश्य-कृत, न्याय्य, धर्म्य, समंजस, उचित, यथान्याय, सविवेक, युक्त योग्य. **2** (Persons) विमृश्य-समीक्ष्य-कारिन्, विवेकिन्, नीतिमत्, परिच्छेदक, नयज्ञ, प्राज्ञ, विवेकदृश्वन्, विशेषज्ञ, सदसद्दर्शिन्. **-ly,** *adv.* युक्तं, समंजसं, यथान्यायं, उचितं, सम्यक्. **2** सविवेकं, सपरिच्छेदं, सुविमृश्य, सुविचार्य, प्राज्ञ-विज्ञ-वत्.

**Jug,** *s.* कुंभः, कलशः, कंसः, उदकपात्रं; *See* **Jar.**

**Jugate,** *a.* संयुक्त, संश्लिष्ट.

**Juggle,** *v.* मुह् c., छल् 10, वंच् 10, दृष्टिं मुह् c. or बंध् 9 P, मायां-कुहकं-इंद्रजालं-कृ 8 U. **-***s.*, **-ing, -ry,** *s.* माया, कुसृति *f.*, दृष्टिमोहः-बंधः, इंद्रजालं, कुहका-कं, इंद्रिय-दृष्टि-मोहः, हस्तलाघवं-चापल्यं. **2** वंचना, छलं, कूटता, प्रतारणा. **-er,** *s.* ऐंद्रजालिकः, मायिन् *m.*, मायाकारः, मायाजीविन् *m.*, कुहकजीविन् *m.*, कौसृतिकः, अ(आ)हितुंडिकः

**Jugular,** *a.* कंठस्थ, कंठ्य.

**Juice,** *s.* रसः, द्रवः, सारः, निर्यासः, आसवः 'j. issuing from the elephant's temples' मदः, दानं, मदवारि. **-less,** *a.* नीरस, अरस, विरस, असार, सारहीन-शून्य, शुष्क, पिंडीर. **-y,** *a.* रसमय ( यी *f.* ), रसपूर्ण, सरस, बहु-रस, रसाढ्य, सार-रस-वत्.

**Jujube,** *s.* बदरी, कर्कंधु-धू *m. f.*, कोलि *f.*, कोलाली; ( fruit ) बदरं, कोलं, कुवलं, फेनिलं, सौवीरं, घोंटा.

**July,** *s.* आषाढश्रावणं.

**Jumble,** *v. t.* संकॄ 6 P, संमिश्र् 10, संक्षिप् 6 P, संकुली-संकरी-कृ 8 U. **-***v. i.* संकॄ pass., संकरी-संकुली-भू 1 P. **-***s.* संकरः, सं-,मिश्रणं, संक्षोभः, संकुलता, संनिपातः.

**Jump,** *v. i.* प्लु 1 A, वल्ग् 1 U, स्कंद् 1 P: 'j. about' नृत् 4 P; 'j. over' लंघ् 1 A, 10; 'j. up' उत्प्लु, उत्पत् 1 P; 'j. with' **Agree,** q. v. **-***s.*, **-ing,** *s.* प्लवनं, उत्पतनं

Institute of Indology & Tamil Studies Cologne University Germany 9/1/2007